स्म. प १

ॐ स्वस्ति श्रीगणेशाय नमः अथयो हिमशैलाग्रे देवदारुवनाश्रमे व्यासमेकाग्रमासीनं पर्यपृच्छन् धार्मिकं १ मनुष्याणां हितार्थाय वर्तमाने कलौ युगे
शौचाचारं यथाशक्ति वद सत्यवतीसुत २ श्रुत्वा तदृषिवाक्यं तु व्यासस्तानर्कसन्निभः प्रत्युवाच महातेजाः श्रुतिस्मृतिविशारदः ३ यद्यहं पूर्वतत्वज्ञो
नास्मि सकलोस्म्यपि तथापि पितरं त्वेतत् पृच्छामि मुनिसत्तमाः ४ ततस्तमृषयः सर्वधर्मतत्वाभिकांक्षिणः ऋषिं व्यासं पुरस्कृत्य गता बदरिकाश्रमं ५
नानावृक्षलताकीर्णे नानापुष्पैरलंकृते यक्षगंधर्वसिद्धश्च नृत्यगीतसमाकुले ६ तस्मिन्नृषिसभामध्ये शक्तिपुत्रं पराशरं व्यासवाक्यावसानेन मुनिपु
ङ्गवः पराशरः ७ नदीप्रस्रवणोपेते पुण्यतीर्थोपशोभिते मृगपक्षिनिनादाढ्ये देवतायतनावृते ८ सुखासीनं महातेजा मुनिशिष्यगणावृतं कृतांज
लिपुटो भूत्वा पितरं प्रत्यभाषत ९ प्रदक्षिणाभिवादैश्च ऋषिभिः परिपूजितः ततः संतुष्टमनसा सो पराशरमहामुनिः १० आसनस्वागतं ब्रूयादासीनां मुनि
पुंगवान् समस्तगणागतेनैव ऋषीणां च समंततः ११ कुशलं कुशलीत्युक्त्वा व्यासः पृच्छत्ततः परं यदि जानासि मे भक्तिं स्नेहाद्वा भक्तवत्सल धर्मं कथ
य मे तात अनुग्राह्यो ह्यहं तव श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथा १२ गार्गेया गौतमाश्चैव तथा गोपालकस्य च आत्रेया विष्णुसंवर्तोद
क्षांगिरसस्तथा शातातपाश्च हारीता याज्ञवल्क्यकृताश्च ये आपस्तंबकृता धर्माः शंखस्य लिखितस्य च १४ धर्मराजकृताश्चैव बृहस्पतिः
कृताश्चैव कात्यायनकृताश्चैव प्राचेतसकृतास्तथा १५ श्रुता ह्येते माद्रवाल्लात स्मर्यमाणा न चालया मन्वर्थेः सर्वधर्माणां कृते त्रेता सुदा
परे १६ धर्मोपकगतयाचारं न शक्या हि कलौ युगे चतुर्वर्णस्य याद्वृत्तिः काचित्साधारणी वद १७ श्रुत्वावीन्निर्णये धर्मं तस्माद्धूलविस्तरं शृणु
युगप्रोयतेन स्मृतिस्तु ऋषयस्तथा १८ कल्पे कल्पे क्षयोत्पत्त्या ब्रह्मविष्णुमहेश्वराः श्रुतिस्मृतिसदाचाराः क्षीयंति प्रभवंति च १९ न कोपि
वेदकर्तारो वेदस्मर्ता चतुर्मुखः तथैव धर्मं स्मरति मनुः कल्पान्तरान्तरे २० अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे अन्ये कलियुगे नृणां
युगह्रासानुरूपतः २१ तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते द्वापरे यज्ञमित्याहुर्दानमेकं कलौ युगे २२ कृते च मानवा धर्मास्त्रेतायां
गौतमः स्मृतः द्वापरे शंखलिखितौ कलौ पाराशराः स्मृताः २३ त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् द्वापरे कुलमेकं स्यात्कर्तारं च
कलौ युगे २४ कृते संभाषणात्पापं त्रेतायां स्पर्शनाद्भवेत् द्वापरे चान्नमादाय कलौ पतति कर्मणा २५ कृते तु तत्क्षणाच्छापः
त्रेतायां दशभिर्दिनैः द्वापरे मासमात्रेण कलौ संवत्सरेण तु २६ अभिगम्य कृते दानं त्रेतायामाहूय दीयते द्वापरे याचमाने स्यात्कलौ
दानं च सेवया २७ अभिगम्योत्तमं दानमाहूतं चैव मध्यमं अधमं याचमानाय स्यात्सेवादानं च निष्फलं २८ कृते चास्थिगताः

वि ५

राम १

श्विकरदाहता ६० शूद्रस्यद्विजसुश्रूषापरमंधर्मकीर्तितं अन्यथाकुरुतेकिंचित्तद्भवेत्तस्यनिष्फलं ६१ लवणंमधुतैलंचदधितक्रंघृतंप
यः नदुष्येच्छूद्रजातीनांकुर्यात्सर्वेषुविक्रयं ६२ सविक्रीणन्मद्यमांसमभक्ष्यस्यचभक्षणं अगम्यागमनेचैवशूद्रःपततिपंचधा ६३ कपिला प०
क्षीरपानेनब्राह्मणीगमनेनच वेदाक्षरविचारेणशूद्रोगच्छत्यधोगतिं ६४ इतिश्रीपराशरेधर्मशास्त्रेकलियुगेचातुर्वर्ण्यधर्मवर्णनंनामप्रथमो
ध्यायः १ अतःपरंगृहस्थस्यधर्माचारंकलौयुगे धर्मंसाधारणंशक्यंचातुर्वर्ण्याश्रमागतं १ तंप्रवक्ष्याम्यहंसर्वंपराशरनिवेदितं षट्कर्मनि
रतोविप्रःकृषिकर्माणिकारयेत् २ क्षुधितंतृषितंश्रांतंबलीवर्दंनयोजयेत् हीनांगंव्याधितंक्लीबंवृषंविप्रोनवाहयेत् ३ स्थूलंनिरुजंतृप्तं
वृषभंषंडवर्जितं वाहयेद्दिवसस्यार्द्धंपश्चात्स्नानेनिवेशयेत् ४ जपेद्देवार्चनेहोमेसंध्यायोगासमभ्यसेत् एकद्वित्रिचतुर्विप्रान्भोजयेत्स्ना
तकान्द्विजान् ५ स्वयंकृष्टेतथाक्षेत्रेधान्यैश्चस्वयमर्जितैः निर्वपेत्पंचयज्ञांश्चक्रतुदीक्षांचकारयेत् ६ तिलान्रसान्नविक्रीतविक्र
येच्चान्यतत्समं विप्रस्यचद्विधावृत्तिस्तृणकाष्टानिविक्रयी ७ संवत्सरेणयत्पापंमत्स्यघातीसमाप्नुयात् एकाहेनतदाप्नोतिसकृद्धेनल्ल न ४
लांगली ८ पाशीवमत्स्यबंधीयव्याधःशूकरपालकः अदातकर्षकश्चैवपंचैतेकर्षकेसमाः ९ कंडनीपेषणीचुल्लीजलकुंभीचमा
र्जनी पंचसूनागृहस्थस्यअहन्यहनिवर्तते १० वृक्षांछित्वामहींभित्वाहत्वातुकृमिकीटकान् कर्षकःखलुयज्ञेनकिंतुपापान्प्रमुंच
ते ११ योनदद्याद्विजातिभ्योराशीमूलमुपागतः सचोरःसचपापिष्ठोब्रह्मघ्नंतंविनिर्दिशेत् १२ राज्ञेदत्वातुषड्भागंदेवतानांतुविंशतिं
त्रयस्त्रिंशच्चविप्राणांकृषिकर्तानलिप्यते क्षत्रियोपिकृषिंकुर्यात्द्विजांश्चैवापिपूजयेत् वैश्यःशूद्रस्तथाकुर्यात्कृषिवाणिज्यशि
ल्पकान् १४ विकर्मकुर्वतेशूद्राद्विजसेवाविवर्जिताः भवंत्यल्पायुषस्तेवैपततिनरकेषुच १५ चतुर्णामपिवर्णानामेषधर्मःसना
तनः ततःशुद्धिंप्रवक्ष्यामिजन्मनोमरणस्यच १६ दशाहेनतुशुध्यंतब्राह्मणाःप्रेतसूतके क्षत्रियोद्वादशाहेनशुध्यतेप्रेतसू
तके वैश्यःपंचदशाहेनशुध्यतेप्रेतसूतके मासेनैकेनशूद्रस्तुशुध्यतेप्रेतसूतके १८ उपासनेनविप्राणामंगशुद्धिस्तुजाय
ते ब्राह्मणानांप्रसादेनचाग्निस्पर्शोविधीयते १९ जातेविप्रोदशाहेन द्वादशाहेनभूपतिः वैश्यःपंचदशाहेनशूद्रोमासेनशु
ध्यते २० एकाहाच्छुध्यतेविप्रोयोग्निवेदसमन्वितः त्र्यहात्केवलवेदीचनिर्गुणोदशभिर्दिनैः २१ जन्मकर्मपरिभ्रष्टःसंध्योपा
सनवर्जितः नामधारकविप्रस्यदशाहंसूतकंभवेत् २२ आजागायामहिष्यश्चब्राह्मणीचप्रसूतिका दशरात्रेणशुध्यंतिभूमि

प्राप्तास्तेनापांमोसस्संस्थिता: द्वापरे रुधिरं यावत्कलावन्नसमाश्रिता: २९ धर्मो जितोह्यधर्मेण जित: सत्योनृतेनत्त जिताभयेनलराजान: स्त्रीभिः
श्चपुरुषा जिता: ३० सीदंन्तचाग्निहोत्राणि गुरुपूजा प्रणस्यति कुमार्यश्च प्रसूयंते तस्मिन्कलियुगे सदा ३१ युगेयुगे चयेधर्मास्तेषुतेषु चयाद्विजा: तेषां
चानं निंदाकर्तव्यायुगरूपाहितेब्राह्मणा: ३२ युगेयुगे चसामर्थ्यं शेषंमुनिविभाषितं पराशरेयथाप्रोक्तं प्रायश्चित्तं प्रदीयते ३३ अहमेवमनुज्ञातान् धर्मान्
नुस्मृत्यब्रवीमि ते चानुवर्ण्यं समाराध्य शृणुध्वं मुनिपुंगवा: ३४ पराशरमतेपुण्यं पवित्रं पापनाशनं चिंतितंब्राह्मणार्थाय धर्मसंस्थापनाय च ३५
चतुर्णामपिवर्णानामाचारोधर्मपालनं आचारभ्रष्टदेहानां भवेद्धर्मपराङ्मुख: ३६ षट्कर्माभिरतोनित्यंदेवतातिथिपूजक: हुतशेषंतुभुंजानो
ब्राह्मणोनावसीदति ३७ संध्यास्नानंजपोहोम: स्वाध्यायोदेवतार्चनं वैश्वदेवातिथेयंचषट्कर्माणिदिनेदिने ३८ प्रियोवायदिवाद्वेष्योमूर्खः पंडितएव
वा वैश्वदेवेतुसंप्राप्त: सोतिथि: स्वर्गसंक्रम: ३९ दूराध्वानपथ: श्रांतं वैश्वदेवउपस्थितं अतिथिंतंविजानीयान्नातिथि: पूर्वमागत: ४० नपृच्छेद्गोत्र
चरणं नस्वाध्यायंव्रतानि च हृदयेकल्पयेत्तस्मिन्सर्वदेवमयोहि स: ४१ अपूर्व: सुव्रतीविप्रोह्यपूर्वोवातपस्तथा वेदाभ्यासरतोनित्यंत्रयोपूर्वोदिनेदिने ४२ वै
श्विकंतथा नित्यंचनागतोयस्मात्तस्मादतिथिरुच्यते ४३ अपूर्व: सुव्रतीविप्रोह्यपूर्वोवातपस्तथा वेदाभ्यासरतोनित्यंत्रयोपूर्वोदिनेदिने ४४ वै
श्वदेवेतुसंप्राप्ते भिक्षुकेगृहमागते उद्धृत्यदेवैश्वदेवार्थं भिक्षुकंनविसर्जयेत् यतीचब्रह्मचारीचपक्वान्नस्वामिनावुभो तयोरन्नमदत्वा
चभुक्त्वाचांद्रायणंचरेत् ४५ यतिहस्तेजलंदद्याद्भैक्ष्यंदद्यात्पुनर्जलं तद्भैक्ष्यंमेरुणातुल्यंतज्जलंसागरोपमं ४६ वैश्वदेवकृतान्दोषान्शक्तो
भिक्षुर्व्यपोहितुं नहिभिक्षुकृतान्दोषान्वैश्वदेवोव्यपोहति ४७ योवेष्टितशिरोभुंक्ते योभुंक्तेदक्षिणामुख: वामपादेकरंन्यस्य तद्वैरक्षांसिभुं
जते ४९ यतिकांचनंदत्वातांबूलंब्रह्मचारिणे चौरेभ्योप्यभयंदत्वादातापिनरकंव्रजेत् ५० चौरोवायदिवाचांडाल: शत्रुर्वापितृघातक: वैश्व
देवेतुसंप्राप्त: सोतिथि: स्वर्गसंक्रम: ५१ काष्ठभारसहस्राणिघृतकुंभशतानि च अतिथिर्यस्यभग्नाशस्तस्यहोमोनिरर्थक: ५२ अतिथि
र्यस्यभग्नाशोगृहात्प्रतिनिवर्तते पितरस्तस्यनाश्नंति दशवर्षाणिपंचच ५३ नपृच्छेद्गोत्रचरणं ... विप्रोपासते तिथिं वेदपारगं अददन्नन्नमाचेतु
भोक्ताभुंक्तेतुकिल्बिषं ५४ ब्राह्मणस्यमुखंक्षेत्रंनिरूषरमकंटकं वापयेत्सर्वबीजानि साकृषि: सर्वकामिनी ५५ सुक्षेत्रेवापयेद्बीजंसुपा
त्रेदापयेद्धनं सुक्षेत्रेचसुपात्रेच प्रक्षिप्तंनैवनश्यति ५६ क्षत्रियोजनपालित्वं शस्त्रपाणि: प्रचंडवान् निर्जित्यपरसैन्यानिक्षितिंधर्मेण
पालयेत् ५७ नश्री: कुलसमाजाताभूषणेनालिखितापिवा खड्गेनाक्रम्यभुंजीतवीरभोग्यावसुंधरा: ५८ पुष्पंपुष्पंविचिन्वीतमूलच्
छेदंनकारयेत् मालाकारइवोद्यानेनयथांगारकारक: ५९ लोहकर्मांतथारत्नंगवांचप्रतिपालनं वाणिज्यंकृषिकर्माणिवैश्य

प्रकृत्यावैश्वदेवार्थंयेभुंजंतिद्विजातय: तेषामन्नंनभुंजीतकाकयोनिंव्रजंतितं

त्वभ्येव न स्पर्शयेद्विस्यात्सषडंगवित् ४९ संपर्काज्जायते दोषो नान्यो दोषोस्ति ब्राह्मणे तस्मात्सर्वप्रयत्नेन संपर्कं वर्जयेद्द्विजः ५०
सूतौ यदि प्रसूतिः स्यात्सा छत्रा वै शावमथापि च गुरुणा लघु शुद्ध्येत न लघुर्गुरुशुद्धकृत् ५१ सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकं सू
तकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ५२ यावत्तन्नौरकं यत्र सूतकं तु सपिंडेभ्यो भवेत् शावेन शुद्ध्यते सूतिर्न सूत्या शुद्ध्यते शवः ५
विवाहेषु च यज्ञेषु वान्तरा मृतसूतके पूर्वसंकल्पितान्नं च भोक्तव्यं तन्मनुरब्रवीत् ५४ अन्तर्दशाहे प्राप्ते पुनर्मरणजन्मनी तावत्स्याद
शुचिर्विप्रो यावत्पूर्वं स्यान्निष्कृतिः ५५ उभाभ्यामप्यविज्ञाते सूतके नैव दोषकृत् एकेनैव परिज्ञाते भोक्ता दोषमवाप्नुयात् ५६ उ
द्दिष्टो नियमे दाने मंत्रे विप्रो निवेदयेत् न च यस्य ऋषिभिर्दृष्टं यथाकालेन शुद्ध्यति ५७ मृण्मयेषु च पात्रेषु तिलभिक्षयवैः सहेम
एकस्याजपदेभ्ये वस्त्रापयेन्नापयेत्तु नः ५८ ब्राह्मणार्थे विपन्नाय ये नारीणां निग्रहेषु च श्राद्धेषु विपन्नानामेकरात्रेण हि सूतकं ५९
यत्र यत्र हतो वीरः शत्रुभिः परिवेष्टितः अक्षयान्लभते लोकान्यदि क्लीबं न भाषते ६० द्वाविमौ पुरुषौ लोके सूर्यमंडलभे
दिनौ परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ६१ जिते वा लभते लक्ष्मीं मृते चापि सुरांगनाः क्षणविध्वंसिनः कायः का चिन्ता
मरणे रणे ६२ रणाग्रः पतितेनाशस्त्राक्रान्तियानि पराङ्मुखः पदे पदे निहन्येत ब्रह्महत्यामिवाप्नुयात् ६३ यस्तु भग्नेषु सैन्येषु विद्रुतेषु स
मन्ततः परित्राणाय दाराग्रेष्वपदन्लेकन्तुभिः समः ६४ सर्वोपि वेदाः सहषडंगैर्गः सर्वोपि यज्ञाः कृतदक्षिणाश्च सार्व्यं च योगं च
वने च वासः सपुच्छस्य गतिं प्रयाति ६५ ललाटदेशे रुधिरं स्रवंतं यस्याहवे तस्य प्रविशेच्च वक्त्रं तत्सोमपानेन किलास्य तुल्यं सं
ग्रामयज्ञप्रवर्तितसन ६६ सत्यसंधा द्विजे हत्वा नाज्जलनिभास्करः एषमेमंडलं भित्वा परं ब्रह्माधिगच्छति ६७ अनाथं
ब्राह्मणं चैव ये वहन्ति द्विजोत्तमः पदे पदे यज्ञफलमानपूर्वां लभंति ते ६८ असगोत्रमसंबंधं प्रेतीभूतं च ब्राह्मणं दहित्वा च
हित्वा च प्राणायामेन शुद्ध्यति ६९ न तेषामशुभं किंचित्पापं वा शुभकर्मणां जलावगाहनात्तेषां सद्यः शौचं विधीयते ७०
प्रेतभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः नीयनमनुगच्छेत त्रिरात्रेणाशुचिर्भवेत् ७१ त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगां प्रा
णायामशतेनैव घृतं प्राश्य शुचिर्भवेत् ७२ विनिर्वर्त्य यदा शूद्रा उदकान्तमुपस्थिताः तदा पश्यन्ति वै विप्रा इति धर्मविदो विदुः ७३
तस्माद्द्विजो मृतं शूद्रं न स्पृशेन्न च दाहयेत् दृष्टे सूर्यावलोकेन शुद्धिरेषा सनातनी ७४ इतिश्रीपराशरे धर्मशास्त्रे सूतककनि

भूमिस्थं च नवोदकं एकपिंडास्तु दायादाः पृथक्दारनिकेतनाः जन्मन्येव विपत्तौ च भवेत्तेषां च सूतकं २४ उभयत्र दशाहानि कुलस्या-
न्नं न भुंजते दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते २५ प्राप्नोति सूतकं गोत्रे चतुर्थपुरुषेण तु दायाद्विच्छेदमाप्नोति पंचमे नात्मवंश-
जः चतुर्थे दशरात्रं स्यात् षण्निशाः पुंसि पंचमे षष्ठे चतुरहाच्छुद्धिः सप्तमे तु दिनत्रयं २७ पंचभिः पूरुषपुत्राश्चत्वाद्धयास्वगोत्रिणः ततः
षट्पुरुषाद्याश्चाद्भोज्याः स्वगोत्रिणः २८ भृग्वग्न्यग्निप्रवेशेषु देशान्तरमृतेषु च बाले प्रेते च संन्यासे सद्यः शौचं विधीयते २९ देशा-
न्तरमृतो यस्तु त्रिरात्राच्छुद्धिरिष्यते ततः संवत्सरादूर्ध्वं सचैलस्नानमाचरेत् ३० देशान्तरमृतः कश्चित् स्वगोत्रः श्रूयते यदि न त्रिरात्रम-
होरात्रं सद्यः स्नात्वा विशुद्ध्यति आत्रिपक्षात्त्रिरात्रं स्यात् षण्मासात्पक्षिणी स्मृता अहः संवत्सरादर्वाक् सद्यः शौचं विधीयते ३२ अजात-
दंतायै बालाय च गर्भाहिनि सूतः तेषामग्निसंस्कारो नाशौचं नोदकक्रिया ३३ यदि गर्भो विपद्येत स्रवते वापि योषितो यावन्मास-
स्थितो गर्भो तावद्दिनानि सूतकं ३४ आचतुर्थाद्भवेत् स्रावः पातः पंचमषष्ठयोः अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् ३५ प्रसूति-
काले संप्राप्ते प्रसवेद्यदि योषिता जीवत्पुत्रः स गोत्रस्य मृते मातुर्हि सूतकं ३६ रात्रावेव समुत्पन्ने मृते रजसि सूतके पूर्वमेव दिनं ग्राह्यं
यावन्नोदयते रविः ३७ अस्तंगते सवितरि याच नारी प्रजायते जन्मनि वृद्धिताच यस्याद्दशलक्ष्यसर्वं. री. ३८ गर्भरात्रविधिः कालः
सूतकादौ विधीयते उषसः प्रागतः स्त्रीणां विज्ञेयं पूर्वकं दिनं ३९ जातदंतानि दत्ताश्रोकृतं च गर्भकर्मणां अग्निसंस्कारमेतेषां
त्रिरात्रं सूतकं भवेत् आदंतजननात्सद्यः आचूडान्नैशिकी स्मृता त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परं ४१ गर्भो यदि विपद्येत दशा-
हे सूतकं भवेत् जीवन् जातो विपन्नश्चेत्स्नानमात्रं विशुध्यति ४२ स्त्रीणां चूडा तथा दानात् संस्कारादप्यधः क्रमात् सद्यः शौ-
च तथैकाहत्र्यहं स्यात् पितृबंधुषु ४३ ब्रह्मचारी गृहे येषां हूयते च हुताशनः संपर्कं येन कुर्वंति भवेत्तेषां न सूतकं ४४ संपर्काद्दुष्य-
ते विप्रो जनने मरणेन च संपर्केषु निवृत्तानां नापैतेषां च सूतकं ४५ शिल्पिनः कारुका वैद्या दासीदासा नरपणा राजानः
श्रोत्रियाश्चैव सद्यः शौचाः प्रकीर्तिताः ४६ सव्रती मंत्रपूतश्च आहिताग्निश्च यो द्विजः राज्ञां च सूतकं नास्ति यस्य जनेति द्विजातयः ४७
प्रसवे गृहमेधीनां न कुर्यात्संकरं द्विजः दशाहेः शुद्धानेमातः स्पर्शिनो पिता शुचिः ४८ पत्नीप्रसविता यस्य संपर्कं कुरुते द्विजः सूतक

न्मरापापाभवेद्ध्रुवं २६ नचस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणं पतिंशुश्रूषयेद्यावत्तेनस्वर्गेमहीयते २७ यस्यपुत्रोगृहेनास्तिगोत्रेजीव
तिनिश्चितं नस्यकः पुत्रकोनामपिंडदद्याद्धनंहरेत् २८ यः कुरोतिनचातिथ्यंनाग्निहोत्रमथापुनः तस्यैवकन्यागृहलोनतनोधर्मपरास्त्रुव
२९ परपूर्वास्त्रियोभर्त्तानपिंडोदकक्रिया कन्यायाः पूर्वभर्तायानाधर्मधर्ममाचरेत् ३० यानाहृतेनमयबीजंयस्यक्षेत्रेप्ररोहति क्षेत्रीनलभ
तेबीजंनबीजीबीजमर्हति ३१ नष्टपरिस्त्रियापुत्रोद्वावस्तनोकुंडगोलकौ पत्यौजीवतिकुंडःस्यान्मृतेभर्तरिगोलकः ३२ औरसःक्षेत्रजश्चै
वदत्तकः पुत्रिकःसुत पद्धनोमातृपितृभ्यांसदृक् पुत्रकाभवन् ३३ परिवित्तिःपरवृत्तोयश्चनेपरिविंदति सर्वेतेनरकंयांतिदातायाजकः
कपंचमः दाराग्निहोत्रसंयोगंयाकुर्यादग्रजेस्थिते परिवेत्तासविज्ञेयः परिवित्तस्तुपूर्वजः ३५ परिवित्तिःपरवेत्ताचक
न्याप्रदाताहकश्च होतानाचान्द्रायणंचरेत् ३६ कृत्वातस्यास्तुनतत्तीर्थंयस्तवेत्तिस्तुभार्यया षण्मासेनापरिन्यस्तभूतः पारापारोवद्धीन
३७ परित्तीयस्वगोत्राचसगोत्रामर्थपरानया न्यायकृत्यानंतस्तस्यपश्यतिकृत्वुविप्राधनं एकमातृप्रसूतानांभ्रातृणांपरिवेत्तने
चतुर्णांचैववर्णानामन्येषांतुनदुष्यति ३९ पित्रपत्न्यस्यपत्न्यश्च परनारीसुताश्चये दाराग्निहोत्रसंयोगेनदोषःपरिविंदते ४० नाप्रय
परिविंदतेनचदानंतपासिच नचश्राद्धकनिष्ठस्यसाचकन्याचिदृपिता ४१ विवाहेतुनिवृत्तेचहोमकालेउपस्थिते ४२रसःप
स्थेनियानारीकन्यकुर्यात्यासक ४२ पुनः स्नानाचनाकन्यामनायस्त्रुरलेकृता प्रक्षकुचीविशुद्धानाश्चिनानांवचनेन
च उद्धाहेनानुपाकन्यानस्याप्नोतिमैथुन पुनर्लभतिभर्तारं यथावपणानयेवसा ४४ वरस्यकुलशीलाभ्यां नदुष्यंतिकदाच
न नमंत्रकारणानश्चवचः कन्यातुतेवदेत् ४५ कुब्जवामनखंजपुगरगदेषुजड्डेषुच जात्यंधवधिरमूकेनदोषःपरिवेदने ४६
नष्टेमृतेप्रव्रजितेक्लीबेचपतितेपतौ पंचस्वापत्सुनारीणांपतिरन्योविधीयते पत्याजीवतियानारीह्युपोष्यव्रतमाचरेत् आयुः
साहरतेभर्तुः सानारीनरकंव्रजेत् ४८ मृतेभर्तरियानारीब्रह्मचर्येव्यवस्थिता सामृतालभतेस्वर्गंयथातेब्रह्मचारिणः ४९
वसंतोषणतुभर्तारमुपोष्यव्रतमाचरेत् सर्वेनश्वानसाभटोनसानारीनरकंव्रजेत् ५० तिस्रःकोटयोर्धकोटीचयानिरोमाणि
मानवे तावत्कालंवसेत्स्वर्गे भर्तारं यानुगच्छति ५१ व्यालग्राहीयथाव्यालंबलादुद्धरतेबिलात् एवमुद्धृत्यनारीतेनव
सहमोदते ५२ कुब्जवामनखंजानाक्लीबानांचिचिरोगिनया उन्मत्तानांतथांधानांनार्यामोक्षोविधीयते ५३ विधवाया

ना१ पृ०

रोयोद्वितीयोध्यायः २ अतिमानादतिक्रोधात्स्नेहाद्वायदिवाभयात् यस्मादुद्बन्धनंकुर्यात्तगतिंलभ्यकथंभवेत् १ अभिमानादतिक्रो
धात्स्नेहाद्वायदिवाभयात् उद्बध्नीयात्स्त्रीपुमान्वापिगतिरेषाविधीयते २ पूयशोणितसंपूर्णेह्यंधतमसिमज्जति षष्टिवर्षसहस्रा
णिनरकंपर्युपासते ३ येचास्यपूर्ववादारायवाश्चप्रदायकाः सर्वेतेपापसंयुक्तानेषांवह्निभिनिष्कृतिः ४ विषाद्धनतयास्त्रैस्तु
मानयेत्तद्घातयेत् मृतोश्चमेधतीयानिनतुसंस्कारमर्हति ५ गोभिर्हतंतथोद्बद्धंब्राह्मणेननुघातितं नेस्पृशंतिचविप्राअपिस्युदो
षभागिनः ६ अग्निदायेस्ववोदारोपचान्यवापगामी च [illegible]:तप्तकृच्छ्रेणशुद्ध्यंतिकूटसाक्षिणएवच ७ अथतप्तकृच्छ्रपरिमाणम् अह
सुष्माःपिबेदापःत्र्यहमुष्णपयःपिबेत् ८ त्र्यहमुष्णघृतंपीत्वावायुभक्षोदिनत्रयं षट्पलंतुपिबेदापस्त्रिपलंतुपयःपिबेत् पलमे
कंपिबेत्सर्पिस्तप्तकृच्छ्रमुदाहृतं इतितप्तकृच्छ्रं हतोविप्रचंडालैस्त्वग्वाचातिनायातिनि अद्द्भईःपुरत्यवानप्रोचनोदकक्रिया १०
श्मशानेस्थापनमार्गात्यप्रेतप्रक्षालयेन्नतः नदहेद्विधिवत्तेननकुर्याच्चोदकक्रिया ११ पतिताभार्यायोयत्नेयःपरित्यजेत्
समृतोलभतेस्त्रीत्वंवैधव्यंचपुनःपुनः ऋतुस्नातायाश्चभार्यायाःसन्निधिंयोनगच्छति पुरुषोबालहत्यायाःपापंप्राप्नो
त्यसंशयः १३ नसर्वयातियोविप्रःपतितादपिभुक्तवान् पंचाहंवाद्व्यहंवाद्वादशाहमथापिवा १४ मासार्द्धंमासमेकंवाम
सत्रयमुपस्थित अब्दार्द्धमब्दमेकंवाभवेदूर्ध्वेनतत्समः १५ त्रिरात्रंप्रथमेपक्षेद्वितीयेकृच्छ्रमाचरेत् तृतीयेपापतंप्राक्[illegible]
सान्तपनं १६ चतुर्थेदशरात्रंस्यात्पराकःपंचमेस्मृतः कुर्याच्चान्द्रायणंषष्ठेसप्तमेचैन्दवंस्मृतं शुद्ध्यर्थमष्टमेचैवषण्मासंकृ
च्छ्रमाचरेत् पक्षसंख्याप्रमाणेनसुवर्णान्यत्रदक्षिणा १८ ऋतुस्नातातुयाभार्यासन्निधौनोपगच्छति घोरायांभ्रूणहत्यायांयु
ज्यतेनात्रसंशयः १९ ऋतुस्नातातुयाभार्याभर्तारंनोपसर्पति सामृतानरकंयातिविधवाभर्तृवर्जिता २० दरिद्रंव्याधितं
मूर्खंभर्तारंयावमन्यते साशुनीजायतेव्यालीसूकरीचपुनःपुनः २१ अपृष्ट्वायेहभर्तारंमुपोष्यव्रतचारिणी नत्फ
लंलभतेसातुगच्छेत्सानारीनरकंव्रजेत् २२ जीवद्भर्तरियानारीउपवासव्रतंचरेत् आयुर्हरतेभर्तुःसानारीनरकंव्रजे
त् २३ मृतेभर्तरियानारीउपोष्यव्रतचारिणी भर्तारंसमुद्धरेत्सावैमृतास्वर्गंचगच्छति २४ बांधवानांसजातीनांयाकुर्यात्व
चःप्रभोःगर्भपातंचकुर्यात्तनयाभाषणंकिंचित् २५ यत्पापंब्रह्महत्यायाःद्विगुणंगर्भपातने प्रायश्चित्तंनतस्या

पा०१

लघ्ट च२

लेवैपतेभिनरकेषुच २४ इतिश्रीपराशरेधर्मशास्त्रेपराशरपु. षट् द्रनेनामचतुर्थोध्यायः ४ अतःपरंप्रवक्ष्यामिहत्यादेनिष्कृतिं
क्रोंचं पराशरेणपूर्वोक्तमनाथेतुहिनायचं १ हंससारसक्रौंचानांचक्रवाकंसकुक्कुटं मयूरमेषघातीचहोरात्रेणशुद्ध्यति
२ बालकारत्मभाटीनिशुकपारावतानिच श्राडीनुबकान्स्पनत्वाचशुद्ध्यतेनक्तभोजनात् ३ चाषकाककपोतादिः
सारीतित्तिरिहिंसकः अंतर्जलेत्थितेउभेसंध्येप्राणायामेनशुद्ध्यति ४ गृध्रश्येनशिविखग्रहभासोलूकनिपातने अपक्का
सीदिनैकंतिष्ठेत्त्रिकालेमारुताशनः ५ वल्गुकाचटकानांचकोकिलाखंजरीटकान् लावकान्रक्तपादांश्चशुद्ध्यतेनक्तभो
जनेः ६ कारंडवचकोराणांपिंगलाकुररीमपि भारद्वाजेनिहत्वाचशुद्ध्यतेशिवपूजनात् ७ भेरुंडपेनभासंचपारावतमक
पिंजलम् पक्षिणामेवसर्वेषामहोरात्रेणशुद्ध्यते ८ हत्वानकुलमार्जारसर्पाजगरडुंडुभान् कृसरान्भोजयेद्विप्रान्लोहदंडंच दक्षिणा ९ शु
ककाशशककागोधामत्स्यकूर्मनिपातने वृंताकफलभक्षी च [illegible] राशुद्ध्यते १० वृकजंबुकऋक्षव्याघ्रान्हत्वाचधातने तिलप्र
स्थद्विजेदद्याद्वायुभक्षोदिनत्रयं ११ गजगवयतुरंगानांमाहिषोष्ट्रनिपातने प्रायश्चित्तमहोरात्रंत्रिसंध्यम् [illegible] कृत्वातेशाम्
हवित्र व्याघ्रनिपातनेशुद्ध्यतेसप्तरात्रेणविप्राणांतर्पणेनच १२ मृगरोहिवराहंचछागानामथतुधानयत् अफालकृष्टमश्नीयादहो
रात्रेणशुद्ध्यते १३ एवंचतुष्पदानांचसर्वेषांवनचारिणां अहोरात्रोपवासेनशुद्ध्यतेनात्रसंशयः १४ शिल्पिनंकारुकंशूद्रंस्त्रियंवायस्तु
घातयेत् प्राजापत्यद्वयंकुर्यात्वृषैकादशदक्षिणा १५ वैश्यंवाक्षत्रियंवापिनिर्दोषंयस्तुघातयेत् सोऽपिकृच्छ्रद्वयंकुर्याद्गोविंशत्यापिदक्षिणा १६ वैश्यंशूद्रक्रियासक्तंविकर्मस्थंचब्राह्मणं हत्वाचांद्रायणंतस्यत्रिंशद्गोश्चैवदक्षिणा
कुर्यात्विप्रो[illegible] चंडालोनिहितःकश्चिद्ब्राह्मणेनकदाचन गोदयमथदानंकृत्वाप्राणायामेनशुद्ध्यति हविष्यंणायव
पानशूद्रेणचैव रागाच चंडालघटसंप्राप्तःकृच्छ्राद्दानंतुमुच्यते १९ अपाकोपवाचांडालाविप्रसंभाषितोयदि द्विजःसंभाषणं
सावित्रींचभवेद्रूपे २१ चंडालस्पर्शनेनैवसवासाजलमाविशेत् चंडालेस्सहसुप्तस्त्रिरात्रमुपवासयेत् २२ चांडालैः
कपथंगत्वागायत्रीस्मरणाच्छुचिः चंडालदर्शनात्सद्यःआदित्यमवलोकयेत् २३ चंडालखातवापीषुपीत्वासलिल
मेवच अज्ञानादप्रमादेनपंचगव्येनशुद्ध्यति २४ चंडालघटभांडस्थमज्ञानात्पिबतेद्विजः तत्क्षणात्क्षीयतेयस्तुप्रजापत्यंस
माचरेत् २५ यदिनच्यवतेनाथशरीरेयस्यजीर्यते. प्रजापत्यंनकर्तव्यंकृच्छ्रंसांतपनंतथा चरेत्सांतपनंविप्रप्राजापत्यंतु

ह
कुर्वन्=
रामः ५

चैरस्वपचचंडालाविप्रेणाभिहृता[illegible] [illegible]सेनपंचगव्येनशुध्यते २०।५

भवेत्कन्यानिर्गोषाभर्तृवर्जिता तस्या याम.पित्र्गे हेसल्लनुवेवमर्थद् ५१ इतिश्रीपाराशरीयेधर्मशास्त्रेतृतीयोध्यायः ३ स्वकु
कामोपसृगालनउद्दिष्टसलुब्राह्मणः स्नानोजपेनगायत्रीब्राह्मणगायत्रम.नुत गणा० गा९ ३. स्नात्व मरा ग्या म्रसगमे समु
दर्शनाद्धापिम गण वगुचिभे २न रवि गाय्रन. स्ना. ४ नादृष्टलग्नब्राह्मण. होमोदकेनचः नत्वाघृतंप्राशयविशुध्यति ५ सप्रणी
तगुनादृष्टःस्त्रिगन्तमुपयान्ति धूनमयावकर्णीवाम्रनप्रोधसम ७ शुनीमहूतीचापिसुनादृष्टस्तुब्राह्मणः प्रतिपत्नोभ
वेत्पूतोविप्रःस्नानेनरीहप ५ शुनाघ्राणमात्रुलीढ सनग्वर्विलिखितमेव अद्भिः प्रक्षाल्य तेनानं शुद्धिरग्निवाचोपगृह
ने ६ शुनाचब्राह्मणीदृष्टा जंबुकेनवृकेनवा उदकेयद्दनमवद्धयान सुर्य .न स्त्रब्राह्मणस्यदाशामेशुनादृष्टस्तुब्राह्म
णः सुषप्रद्दलिलीकूलानत्र. (-)नाद्दकु.उने ८ ब्राह्मणेन स्वपाव नगाभधिप्रे.नोद्धि गाद्दनाभिर्मनाद्रप्रोविप्रायेगान्न
द्गेनचा द्ददेन्त्रम्र. स्नणोविप्रोलोकागात्र नवर्जिते सप्रक्षाव्य च दत्वागपिपेत्तुचमर्थण. १ अनापत्यचरेत्पञ्चाहिप्राला
मनुशासनाने द्दगारयोनिपुनर्गच्छ्दीप्रद्दालय न: पुनद्दत्वके. चमेत्रेणाच पृ. कपूणक स्माकिनाग्निमतः क
स्मान्प्रयासेद्यापिद्द्यनः द्दपानावनु प्राप्त. गाग्निवर्नेनेगृह्द. .काग्भूयनामोषिसत्रम. कृष्णाजिनेो
से कोर्पक प्राश्नपुष्णाक्रतिः पट्पानालिद्दपा स्रवपलाशाक्षसः नन २८ वल्यादिप्रादि भागोपर्षकरो विनिर्दिपेत्त
वाहुभ्यापृष्ठानेद्दद्यादगुल्ली.पूनयोराते पानेचा रसिकंड्ना अंग्राद्यौ योटेन्यामे. अष्टोचूपणादाद्दद्यापंचमेचुच
चवितमेत २६ सप्तान्न्यानिकञ्चम. जानु घचविनति. घटागल्ला ना चपाद्दाअीगीतयोन्याशेन् शिवायोण
किंनिक्षिप्य स्रपिगिद्दघरांतथा मुखनटा णाद्द नचूघामदसनेन वभूत् १८ कर्णौ ऊपलं. पृष्टेचमृशलत
था द्दपद्चोरसितेहि प्रानंडुलान्पानिलान्मुखे २९ आज्ये पा त्रणि द्दादाण्यस्थालीचदत्वा घी: कृतौनेगमखेधा
दो १ ग्निहीरण्यकलशि हिपेत् ३० अग्निहोत्रोपकरणामयाचेत विन्यसेत् अस्सास्वर्गाय लोकाय जुहुया क्षघृता
हुतिः ३१ द्दयानुमोणवाथनासेनोपापिसधर्मणः यथाद्दहनसंस्कारस्तथाकार्यविचक्षणैः ३२ ईदृशंतुविधिकुर्याद
ब्रह्मलोकगतिर्धुवं येवदृतिद्धिजातिनयानित रुगति ३ अनद्दाकुद्दनकिंचिदात्मबुद्धिप्रमादिना भवनास्पायत्र

६

लालकृष्णः स्वयं कुर्वंत्यनुग्रहं सर्वधर्म्ममयाश्चानिहिते [illegible] मेभाषनः स्वयं ७ दुर्बलेनुग्रहः प्रोक्तः लक्ष्यांधवालग्रहतो:
मुनीनपाणामधहर्षिन्मस्मीचानुग्रहस्मृतः ८ ज्ञातिधर्मानग्रहा [illegible] हरीतिस्मृतिर्देवता: श्रामालिरसः धाम्यमाग्निहानुः लेलना
भेत् ९ मेदाकृष्टिहियालोभात्ह्याद्यानतापिवा कुर्यंत्यनुग्रहं [illegible] नेषुगच्छति १० [illegible] लिनि
गमेनुये नेनस्य [illegible] कर्नार: पतंतिनरकं ध्रुवं ११ सर्वहिनि [illegible] प्रायश्चितमेकापिवेदृष्टिः कुर्य [illegible] हिंसानी नामकुर्वनभू
लहाभवेत् १२ नमवनियमंकृत्वाब्राह्मणोयोनमन्यते हृयानस्मापयास [illegible] नपुनस्मृते १३ सातिबमोषधे [illegible]
गश्चित्तमण्यापि [illegible] नाप्नाम्नेनयाद्भूयातत्तमाद्वेहल यातक १४ [illegible] लाविता स्यादस्वन्य [illegible] कदाचना
स्यानुग्रहनेच [illegible] [illegible] मंसिना १५ प्रायश्चित्तमहाकाल [illegible] दुर्बलमघच [illegible] पाश्चे [illegible] कमानि
भवति ५८ सर्वानिच्छिद्रयस्य [illegible] प्राप्तन्ता : ब्राह्मणाणवभाषंतत्त्वमन [illegible] यथाचि [illegible] ह्यचनमन्यथा उप
वासव्रतस्नानेती [illegible] १६ [illegible] नियहाः [illegible] हिलि ट्वना
म ५१ प्रणाम्यालिरसाधाम्यायिश्रामपकललभेत् [illegible] गोज [illegible] १८ [illegible] १९ एवावाकर्याटके नेयस्तु स्याति
मलिनाजना: ब्राह्मणायानिभाषुतेनानि मन्यं निरद्वता २० सर्वं [illegible] ह्यचनमन्यथा श्रुत्वा [illegible]
सपुत्रमाहिकाके [illegible] नटन्नेम [illegible] स्थान [illegible] भुंज्ञानएणविप्रेषुयःपात्रंतुविसर्ज
न २२ नदुच्छिष्टंसम [illegible] भाजन पादुका [illegible] स्थानना [illegible] शुना [illegible] लहस्ते
वाभाजनपा [illegible] येवेहि [illegible] भुंक्ते [illegible] यामप [illegible] करेन्यस्त [illegible] सिभुंजते पक्का
नेषुनिविहृचनमस्तु [illegible] यथापनशारे [illegible] प्राप्य [illegible] २६ शूद्रेणा [illegible] कृतुनाकाकेनावोदिक केनेदस्तु
ष्ठानेचान्नप्राप्तगम्यानिवेदिन २७ प्रस्या [illegible] स्यामत्रिवाडक [illegible] कस्याच्छुद्धिः [illegible]
काकश्वनायलीढन्नु श्राषुणाधापिमार्जारिः स्वल्पम [illegible] प्राजोह [illegible] विद्वाणाद [illegible] भवेत् २९ इत्थापराल यापर्वतधर्मप्रा

६

स्त्रिय: २१ चंडालभांडसंस्पृष्टं पीत्वा कूपजलं नरः गोमूत्रयावकाहारो त्रिरात्रेण विशुध्यति एकस्मिं कारणे तो व ६ उपव
च कवर्ज्जेको भेदि भिन्ना: समानेष्वनन्नाति प: उभ्द्भिाल्लि स स्पृष्टं शुनाथ दृष्ट्वा वा द्विजा उपोष्य रजनीमेकां पंचगव्येन शुध्य
ति नखधेनुचरेदूर्ध्वं पाद: शुद्धस्य शुद्धिकृत् भुक्तानां ज्ञेनय स्तु चूडा स्नात्वा मयापिवा १ गोमूत्र यावकाहारो द्विरात्रेण
शुध्यति एव कं यस्मसम्मा यासा मूत्राद्यावकादपि १९ दृष्ट्वा द्विजः मस्य स्य वर्णं च समादिशेत् अविज्ञातस्तु चांडा
लि स्ने यो दिवसानि २० सो बलान चापि वासाद्विजा कर्वन्तनुगृह्य ऋषिवक्त्राच्च नाधर्मान् स्मरंतो धर्मपरायणा: २१ प
यं समुद्धरेत् पापिष्ठं पापि कृ करोत् सहदधानुभुंजीत सर्पिषा चान्नं २ क्षीरेण च स्वयं भुक्ता सप्त गोमूत्र यावकं भ
वद्द्ध नभुंजीत नाद्विजा गोर मपिवेत् त्रिप लं दद्यात् क्षीरस्य सर्पिषो यावकस्य च पलमेकं चतुष्कं चाभवेत्स सप्तरात्रि दिन
विप्र भोजनं दद्यात् हिरण्यं च दक्षिणा । द्वारकुवीत धान्यानि गृहे कुर्या हुताशने कुसुमं गुडकर्पासं लवणं तैलसर्पि
षी तिलं फलानि मूलानि वहि: प्रकार्या प्रहृष्य च सकृ सप्तकं भूमेः कृता ब्राह्मणभोजनं तिलं गावो वृषं चैकं दद्या द्वि
प्रेषु दक्षिणां १० चर्मकारस्य लब्धकं चैव पुष्कसं चातुर्वर्ण्यं गृहे प्रविश्य वित्ता चाप्रतिषेधाने आन्या मुनि प्रकीर्तिकुर्यात्
पूर्वोक्तस्याद्र्धमेव च गृहदाहं न कुर्वीत सर्वं समाचरेत् गृहस्याभ्यान्तरं गच्छेच्च डाला यस्य कस्य चित् ततस्तस्माद् गृहाद्दे
निस्सार्य मृण्मयांडानि विसर्जयेत् रसपूर्णं नु मृण्मयं तत्स्यापनं कटाचन गोमयोदक संमिश्रितोयै: संमार्जयेद् गृहं १३ इ
ति श्रीपाराशरे धर्मशास्त्रे प्रायश्चित्ते निर्द्धारणं नाम पंचमोऽध्याय: ५ ॐ ब्राह्मणस्य व्रणद्वारे पूयशोणितसंकुले
कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत् १ गवां मूत्र पुरीषेण दधि क्षीरेण सर्पिषा त्र्यहं स्नात्वा च पीत्वा च कृमिदुष्ट: शुचिर्भवे
त् २ क्षत्रियस्तु सुवर्णस्य पंचमाषं प्रदापयेत् गां दद्याद्वैश्य स्य उपवासं विनिर्दिशेत् ३ शूद्राणां नोपवास
श्च शूद्रो दानेन शुध्यति गां दद्याच्च द्वृषं चैकं कुर्याद् ब्राह्मणभोजनं अच्छूतं वापि सर्पं दष्टस्तु निष्कृति ब्राह्मणानुनमस्कृ
त्य पंचगव्येन शुध्यति व्याधितव्यसने श्रान्ते दुर्भिक्षे विग्रहे पुच उपवासं व्रतं होमं द्विजसंभाषणं स्वयं ६ अथ वा ब्राह्मण

ष

कलमूला/(वन्त्राणि जले: सप्ताह्मानिच हि

पत्र

ऋतेपतितानांतुसंभाषेदक्षिणंश्रवणंस्पृशेत् ५६ अग्निरापश्चवेदाश्चसोमसूर्यानिलस्तथा एतेसर्वेपिविप्राणांश्रोत्रेति
ष्ठंतिदक्षिणे ५७ प्रभासादीनितीर्थानिगंगाद्याःसरितस्तथा । विप्रस्यदक्षिणेकर्णेसान्निध्यंमनुरब्रवीत् ५८ येनकेन
न॰ प्रकारेणमृदुनादारुणेनच उद्धरेद्दीनमात्मानंसमर्थो धर्ममाचरेत् ५९ आपत्कालेचविप्रोसौप्रोचाचारंनचिंतयेत् आ
त्मानमुद्धरेत्पश्चात्समर्थोधर्ममाचरेत् ६० आदित्यकिरणैःशांतिर्यास्नानंप्रशस्यते अप्रशस्तंनिशिस्नानंराहोरन्यत्रद
र्शनात् ६१ मारुतामरुद्राश्वआदित्याश्चहिदेवताः तस्मात्स्नानंजपोहोमोदानंचराहुदर्शने ६२ अन्यथाहृत्सुभा
राशिस्तस्मात्तोपरिवर्जयेत् जातेपुत्रेविवाहेचप्राप्तेचगृहणास्पात् ६३ शावेयोदानमस्तीतिन्नान्यत्रेतद्विधीयते प्रातः
स्नानंजपंकुर्यात्संध्याकर्मसुरार्चनं ६४ ग्राह्यमानेभवेत्स्नानंगृहीतेहोमाविधीयते त्याज्यमानेभवेद्दानंविमुक्तेस्नान
माचरेत् ६५ सूर्येचंद्रगुरुणाणाभावादाल्यभुक्तयोस्तयोः अमुक्तयोरस्तगयोर्दृष्ट्वास्नात्वापरेहनि गृहणानुभवेद्दिवाः प्रणमा
दृश्यामतःभुंजेतावृद्धिनात्पूर्वेद्वितीयप्रहराग्रभि ६७ सर्वेगंगासमंतोयंसर्वेवराद्विजातयः सर्वेभूमिसमंदानंराहुग्रस्ते
दिवाकरे ६८ इतिश्रीपाराशरेधर्मशास्त्रेप्रायश्चित्तनिर्णयोनामषष्ठोध्यायः ६ गवांबंधनमुक्तानांभवेन्मृत्युरकामतः १
अकामकृतपापस्यप्रायश्चित्तंकथंभवेत् वेदवेदांगतत्वज्ञाधर्मशास्त्रवहुश्रुताः स्वकर्मनिरताद्दांतास्तेषांपापंनिवेदयेत् २
सावित्रीमंत्रानेत्यासंध्योपासनवर्जिताः अज्ञानात्कृष्यकर्माणोब्राह्मणानामोत्रितः ३ अव्रतानाममंत्राणांजातमात्रोप
जीविनां सहस्रशःसमवेतानांपरिषत्वंनविद्यते ४ यद्वदंतितमोमूढाः पूर्वधर्ममजानतः प्रायश्चित्तंभवेत्पूतं कि मस्मा ५
ल्बिषं ... परिषद्व्रजेत् ५ यदाचिंतितस्थितंतोयंमारुतावैशरणमुच्यते एवंपरिषदाघोरंनाशयेत्स्यनिष्कृतिः ६ नेवगच्छ
तिकर्तारं नैवगच्छतिपार्षदं मारुतार्कादिसंयोगात्पापंनश्यतितोयवत् ७ चत्वारोवात्रयोवापिवेदवंतोग्निहोत्रिणः ब्रा
ह्मणानांसमर्थायेपरिषत्सैवमुच्यते ८ अनाहिताग्नयोयेन्येवेदवेदांगपारगाः पंचत्रयोवावेदज्ञाःपरिषत्तत्रकीर्त्तिता ६

स्वेषु पक्षे उक्षार्थे धर्मशास्त्रं तु मुनिवक्त्रादिभिः स्मृताः यासां चोद्धृत्य तन्मात्रं यच्छिष्टं लेरूपद्रुतं द्रुणाशनेन तं स्पृष्टं सुवर्णसलि
लेन च विप्राणां ब्रह्मघोषेण भोज्यं भवति तत्क्षणात् मूर्खो दुर्व्यसं शुद्धिः पराशरवचोदिता दारुपात्राणि सर्वाणि लोहं ना क्षिरिव
नाशुचिः भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति श्वापसम्बलनैर्हिरण्यमीनतोयेन शोधयेत् दन्तपात्रं च पाषाणमेव चर्म
जने मणिशङ्खप्रवालानि तेनैव क्षालनात् शुचि पाषाणं तु पुनर्घृष्टेः शुद्धिरेवाउदाहृता ५६ मृद्भाण्डं दहनाच्छुद्धिर्भूमिः शुध्या
ति मार्जनात् नेत्रवल्कलचीराणां वस्त्रकार्पासलोमकम् उर्णानां तत्र पहान्नां जलाच्छुद्धि विधीयते ५८ तूलकार्पासधा
न्यानि पीतरक्ताम्बराणि च प्रोक्षयित्वार्कतापेन प्रोक्षयित्वा शुचिः भवेत् वल्कपस्करसूर्पाणां शकटं चर्मफलानि च मृत्काष्ठ
शाटिरज्जूनां मृत्काष्ठशुद्धिर्यथाच्छुद्धिः तूलकार्पासधान्यानि पुष्परक्ताम्बराणि च ६० प्रोक्षयित्वार्कतापेन प्रोक्षणेन तु विधीयते
प्रथमस्थाहि तीयस्थान तृतीयस्वावगाहिने ६२ चतुर्थो वमने प्रोक्त पञ्चमाभ्युद्दशाच्छुद्धिः सूर्यामूत्रं संस्पृष्टं शुद्धिः स्नानोपले
खनैः रजस्वला तु नारी चिकर्मयानगच्छते नदीवेगेन शुद्धेन यत्र लेपो न दृश्यते वैध्यानुवृषलीज्ञेयाद्वृषलीनु मनय
जा अपरा वृषली ज्ञेया कुमारी या रजस्वला संप्राप्ते द्वादशे वर्षे यः कन्यां न प्रयच्छति मासि मासि रजस्तस्याः पिता पिबति शोणित
ते माता चैव पिता चैव ज्येष्ठभ्राता तथैव च त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलां यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहि
तः अश्राद्धेयो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः यः करोत्येकरात्रेण वृषलीसेवनं द्विजः स भैक्ष्यभुग् जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति
ते गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च दशभिर्भस्मभिः शुध्यन्ते श्वकाकोपहतानि च ६९ आयसानि तु पात्राणि
शुद्धानि विनि घर्षणात् ५ मार्जारमक्षिकाकीटपतङ्गकृमिदर्दुराः मेध्यामेध्यं स्पृशन्तोऽपि नोच्छिष्टं मनुरब्रवीत् ७१ शुचिर्भू
मिगतं तोयं पुरुषे वस्त्रे विप्रुषः तुभुक्तिमङ्गलिस्नेह नोच्छिष्टं धर्मसाधनं ७२ नाम्बुलेषु फलेषु च भुक्तस्नेहानुलेपने म
धुपर्के च सोमे च नोच्छिष्टं मनुरब्रवीत् ७३ नोच्छिष्टं श्रवणं तोयं नदीषु च विशेषतः मुखमङ्गुलिभिः स्पृष्टं नोच्छिष्टं मनुरब्रवी
त् ७४ दृष्टा भङ्गे प्रवासे च व्याधौ व्यसनेऽपि वा रक्षेदात्मदेहं सर्वकर्माणि कारयेत् दुर्नेनिर्धीव नैवेद्य दत्तोच्छिष्टतया

तिक्रम्य राजा यं तं कर्तुमर्हति ३१ तत्पापं शतधा भूत्वा राजानमनुगच्छति प्रायश्चित्तमसमाद्द्याद्देवतायतनाग्रतः ३३ आत्मानं पा
वयेत्पश्चात्सपत्नं वै नमातरं सशिखं वपनं कृत्वा त्रिसंध्यमवगाहनं गवां गोष्ठे वसेद्रात्रौ दिवा ताः समनुव्रजेत् उष्णे वर्षति शी
ते वा मारुते वाति वा भृशं कुर्वीत नात्मनस्त्राणं गोरकृत्वा तु शक्तितः आत्मनो यदि वान्येषां गृहे क्षेत्रे खलेऽपि वा भक्षयन्तीं न क
थयेत्पिबन्तं चैव वत्सकं पिबन्तीषु पिबेत्तोयं संविशन्तीषु संविशेत् ३४ पतितां पङ्कमग्नां वा सर्वप्राणैः समुद्धरेत् गवार्थे ब्रा
ह्मणार्थे वा सद्यः प्राणान्परित्यजेत् मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य च गोवधस्यानुरूपेण प्रायश्चित्तं विनिर्दिशेत् प्रा
जापत्यं ततः कृच्छ्रं विभजेत्तच्चतुर्विधं एकाहमेकभक्तः स्यादेकाहं नक्तभोजनं अयाचितमेकमेकाहं एकाहं मारुताशनः
पादः स्यादेकभक्तेन स्यान्नक्तभोजनैः अयाचितेन त्रिदिनं मारुताशनः एकभक्तेन चत्वारो नक्तभोजनैः
याचिते चतुरश्चत्वारो मारुताशनः प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं गोधनादि विप्राणां दानं कार्यं द्वित्रिचतुर्गुणं
विप्राय दक्षिणां दद्यात्पवित्राणि द्विजातये ३५ ब्राह्मणान्भोजयित्वा तु सद्यः शुद्धो न संशयः ३६ इति श्रीपराशरे धर्मशास्त्रे गो
वधप्रायश्चित्तविधिः सप्तमोऽध्यायः ७ गवां संरक्षणार्थाय न दुष्येद्रोधबन्धने तद्वधं तु न तं विद्यात्कामाकामकृतं तथा
२ दण्डादूर्ध्वं यदन्येन प्रहारेण निपातयेत् प्रायश्चित्तं चरेत्प्रोक्तं द्विगुणं गोव्रतं चरेत् २ अङ्गुष्ठमात्रः स्थूलश्च बाहुमात्रप्र
माणतः सार्द्रश्च सपलाशश्च दण्ड इत्यभिधीयते ३ एकपादं चरेद्रोधे द्विपादं बन्धने चरेत् योजने पादहीनं स्याच्चरेत्सर्वं
निपातने ४ गोचारे वा गृहे वापि दुर्गेष्वपि समेषु वा नदीष्वथ समुद्रेषु त्वन्येष्वपि नदीमुखे ५ दुर्गेषु मृता गावस्त
द्धि रोधनमुच्यते योक्त्रदामकडोराद्यैः घण्टाभरणभूषणैः ६ गृहे वापि वने वापि बन्धने गा मृता यदि तद्बन्धनं विधि
द्यात्कामकामेन न सक्तेत् ७ हलेन शकटे पङ्क्तौ पृष्ठे वा पीडितो नरः गोपतिं मृत्युमाप्नोति योजने तद्वधे ८ मत्तः
प्रमत्त उन्मत्तश्चेतनो वाप्यचेतनः कामाकामकृते क्रुद्धे दण्डाघाते महाबलैः कूपे खाते तडागे वा तुङ्गे सेतौ च वा
पानीये विपन्नानां प्रायश्चित्तं न विद्यते कूपखाते तडागे च नदीतीरे तथैव च अन्येषु धर्मखातेषु प्रायश्चित्तं न विद्यते

नैतत् भोजी... ७

स्या

रामः ८

गायत्रीमात्रसाराये वीर्यवेदविद्द्विजाः एकविंशतिभिस्तैस्तु परिषत्सा प्रकीर्तिता १० मुनीनामात्मविद्यानां द्विजानां यज्ञया
जिनाम् ऋतिप्रयत्नानां यस्य सा एषा परिषन्मता ११ पंचपूर्वं मया प्रोक्ता स्तेषां चासंभवे सति स्ववृत्तिपरितुष्टानां परिषत्सा उदा
हृता १२ अत ऊर्ध्वं तु विप्राः केवलं नामधारकाः परिषत्त्वं न तेषां वै सहस्रगणितेष्वपि १३ प्रमाणमागमा स्युस्ते धर्मप्रवृत्ति
वे नेषां न त्रायते पापं सहस्रं गुरुवासिनां १४ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ब्राह्मणस्त्वनधीयानास्त्रयस्ते ना
मधारकाः १५ चित्रकर्म यथानेकैः संस्कारैर्लिख्यते यथा ब्राह्मण्यमपि येन स्यात् संस्कारविधिपूर्वकं १६ यथा षंढोऽफ
लः स्त्रीषु यथा गौर्गवि चाफलाः यथा चाज्ञे फलं दानं यथा विप्रोऽनृचोऽफलः १७ ग्रामस्थानं यथा शून्यं यथा कूपस्तु निर्जलः ब्रा
ह्मणास्त्वनधीयानास्त्रयस्ते नामधारकाः १८ प्रायश्चित्तं प्रयच्छन्ति ये द्विजा नामधारकाः ते द्विजाः पापकर्माणः समेता नरकं
ययुः १९ अभक्ष्येषु भक्षणानेषु दीप्तोऽग्निः सर्वभक्षकः तथैव ज्ञानदो विप्रः सर्वभक्ष्योऽपि दैवतं २० पंचयज्ञरता ये च ये पठंति सं
हिता द्विजाः त्रैलोक्यं धारयिष्यन्ति पंचेंद्रियरतास्तथा २१ ग्रासार्थेनापि हिंसायां पितृध्यानेन गच्छति प्रायश्चित्तं तथा प्राप्नोति
चांद्रायणं चरेत् २२ केशानां परिरक्षार्थं द्विगुणं व्रतमाचरेत् राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः २३ अकृत्वा वपनं तेषां
प्रायश्चित्तेन शुद्ध्यति सर्वकेशान्समुद्धृत्य छेदयेदंगुलद्वयं २४ धृतिरग्निर्मनोवपुः संतोषः समिधस्तथा पंचेंद्रियपशुहृत्
त्वा योजयेत्सदा द्विजः २५ अमेध्यानि च सर्वाणि प्राश्नीयान्मुटकेन या तथैव किल्विषं सर्वं प्रदहत्यग्निः द्विजात्मनि तथैव ज्ञा
नवह्निप्रभुजीयाद्बहुभोजनं मूर्खविप्रस्य यद्दत्तं भस्मीभवति काष्ठवत् २७ गायत्रीरहितो विप्रः शूद्रादपि विहीनो भवेत् गाय
त्रीब्रह्मतत्त्वज्ञाः संपूज्यास्ते द्विजोत्तमाः २८ दुःशीलोऽपि द्विजः पूज्यः न शूद्रो विजितेंद्रियः कः परित्यज्य दुष्टां गां दुहेच्छी
लवतीं खरीं कः परित्यज्य विद्वांसं मूर्खं संपूजयेद्बुधः धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः ३० क्रीडार्थमपि यद्ब्रूयुः स
धर्मः परमः स्मृतः राज्ञा चानुमतेनैव प्रायश्चित्तं वदेद्द्विजः ३१ स्वयमेव न कर्तव्या प्रायश्चित्तस्य निष्कृतिः ब्राह्मणान्

रणाम चैनेनत्या चंधुमध्येष्ठं कुर्यात् ह्वोद्धृत्य गां चरेत् गृहेषु सन्नेनित्यं च्छुद्धे नियमतः सदा ३३ इदं वेगो वधं कृत्वा
प्रच्छादयति मानवः स याति नरके घोरे कालसूत्रे संतापने ३४ विमुक्तो नरकात्तस्मात् मर्त्यलोके तु जायते क्लीबो कुष्ठी
न कुत्सांगी स भवेत्पुनः पुनः तस्मात् प्रकाशयेत्पापं सधर्मं संततं चरेत् स्त्रीणां कृते तु धेनुकं प्रदद्याद्भृगुसूनवे ३६ वि
दृश्यादमेकं तु द्वौ पादौ गर्भसंभवे पादोनं व्रतमाचेष्ठ हत्वा गर्भमचेतनं ३७ पादे गोरोमवपनं द्विपादे श्मश्रुधारणं त्रिपा
दे तु शिखावर्जं सशिखं तु निपातने ३८ पादे वस्त्रयुगं दद्यात् द्विपादे कांस्यभाजनं त्रिपादे तु वृषं दद्यात् चतुर्थे च समं स्मृतं
३९ निष्पन्नसर्वगात्रेषु दृश्यमानेषु चेतने अंगप्रत्यंगसंपूर्णे द्विगुणं गोव्रतं चरेत् ४० एवं पाषाणरोगेण गावो शुद्धिम
भीप्सवः स्त्रीबालगोभ्यो हेतुना तिस्रो धेनुकारयेत् क्रोधाद्विनाशयेत्ते दोषान्स्मात् क्रोधं विवर्जयेत् ४१ इति श्री परा
शरे धर्मशास्त्रे प्रायश्चित्तविनिर्णयो नाम अष्टमोऽध्यायः ८ चातुर्वर्ण्यस्य सर्वस्य यत्प्रोक्ता मुनिनिष्कृतिः अगम्यागमने
च शुद्धिश्चान्द्रायणेन तु १ एकैकं वर्धयेत् ग्रासं शुक्ले कृष्णे च ह्रासयेत् अमावास्यां न भुञ्जीत एवं चान्द्रायणो विधिः २ कुक्कुटा
ण्डप्रमाणं तु ग्रासं च परिकल्पयेत् अन्यथा भावदुष्टेन न च धर्मेण शुद्ध्यति प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं
गोद्वयं वस्त्रयुग्मं च दद्याद्विप्रेषु दक्षिणां ४ चाण्डालीं वा श्वपाकीं वा अभिगच्छति यो द्विजः त्रिरात्रमुपवासी स्यात् विप्राणा
मनुशासनात् ५ सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरेत् ब्रह्मकूर्चं ततः कृत्वा कुर्याद्ब्राह्मणतर्पणम् ६ गायत्रीं च जपे
न्नित्यं दद्याद्गोमिथुनद्वयं विप्राय दक्षिणां दद्यात् शुद्धिमाप्नोति संशयः ७ क्षत्रियो वापि वैश्यो वा चाण्डालीगमने कृते
प्रजापत्यद्वयं कुर्याद्दद्याद्गोमिथुनद्वयं श्वपाकीमथ चाण्डालीं शूद्रो वा यदि गच्छति प्राजापत्यं चरेत्कृच्छ्रं दद्याद्गोमिथु
नं तथा ९ मातरं यदि गच्छेत्तु भगिनीं पुत्रिकां तथा एतांस्तु मोहितो गत्वा त्रीणि कृच्छ्राणि समाचरेत् १० चान्द्रायणत्रयं

राम ९

ने बंधनद्वारनिरोधेषु योनरः कर्तुमिच्छति स्वकार्येण गृहकार्येषु प्रायश्चित्तं विनिर्दिशेत् मदनात्यन्तभिर्गावः लकुधलुनिप
तन यस्याकस्मात्सर्वस्यायापुरितप्रयत्नतः यत्नेनुविचिकित्सेन गूढगर्भविमोक्षणे यत्नेकृतेविपद्येत प्रायश्चित्तंनविद्य
ते तैलभेषजपानेषु रदशेण प्रदापयेत् विशल्यनेत्रगाभोणांप्रमदेनालिपातके १५ निशिबंधनवद्धेषु सर्पव्याघ्रह
तेषु च अग्निविद्युत्प्रपन्नानांप्रायश्चित्तंनविद्यते १६ ग्रामघातनिरोधेषु वेश्मभंगे च घातना अतिवृष्टिहतानां च प्रा
यश्चित्तंनविद्यते १७ युध्यतां गोवृषाणांच ये पार्श्वे प्रेक्षकाः स्थिताः अनिवारयतांतेषां सर्वे पापातके भवेत् १८ एको
हता यावद्बहुभिः समेतैः नज्ञायते न मृतो यघातकेयो द्विसनतेषामुपलभ्य हतानिवर्तनीयांतकसंनियुक्त १९ प्राय
श्चित्तंतत्सर्वे ग्रवाके मृपतेवृषः पादपादंच द्वन्याश्चरेयुर्लेपृथक् पृथक् २० पाषाणेणापिदंडेन गावो येनाभिघातिताः
शृंगभंगेपयपातश्च ह्रद्वलांगूलघातकः २१ लांगूलेपादकृत्ने च द्वे पादाचस्थिभजने त्रिपादं चैव तु एवं शृंगे सर्वं सम
माचरेत् यावत्पूर्वांगसप्राप्तिस्तावत्तांपोषयेन्नरः व्रणभंगश्च कर्तव्य श्चेहाभंग अपालीना तावच्चैवतुभक्तैव्यायावद्बु
गाबलोभवेत् गोरूपंब्राह्मणास्याग्रे पुष्पंकृत्वानिवेदयेत् २३ यदिनाप्राप्तपूर्वांगोहीनदेहोभवेद्यदि गोघातकस्यतस्यार्
द्धं प्रायश्चित्तं विनिर्दिशेत् २४ क्रोधनेवधिनः कश्चित्प्रहारं पातयेद्गवां देहोपलशिलाचोश्च मूर्च्छितः पतितोयदि २५
उत्थितानुपदंगच्छेत् चसप्तदशपंचवा नृणांग्रासेनतोयंवापिबन्ते स्वयं २६ चत्वार उदकं पीत्वा हत्वैद्रीषं
नायति पूर्वंभोगमृतानां च प्रायश्चित्तं नविद्यते २७ शृंगभंगेस्थिभंगे च करभंगे तथैव च यदिजीवति मासेन प्राय
श्चित्तंनविद्यते २८ यत्नु गामूत्रकृद्दृष्ट्वा प्रवगृहेनमाहितः तत्पापंजायतेतेन स्नातस्नाहं स्वप्रकाशयेत् २९ एवं ना
रीकुमारीणांशिरसोऽद्भुतकंभवेत् नस्त्रीणां केशवपनं न दूरशयनं तथा न च गोष्ठे वसेद्रात्रौ न दिने संस्थितः व्रजे तु
नदीषु संगमे चैव अरण्ये पशुविप्राषन ३१ नस्त्रीणांविजनवासोव्रतमेषां समाचरेत् त्रिसंध्यं स्नानमित्युक्तं सु

पा॰ स्मृ॰ अ॰ ९

कामभोहाद्यधो गच्छेत्यक्त्वा बंधून्सुतान्पतीन् सातु नष्टा विनिर्दिष्टा न तु लज्जनं पुनः ३१ पितृमातृगृहे चैव जारस्यैव गृहे
तथा उच्छिष्टगृहे चैव पंचगव्येन शुध्यति ३२ पात्रे न्मृण्मये पात्राणि घस्त्रकाष्ठादि सिंचयेत् संभारान्स्थापयेत्स
र्वान् गोकेशास्थोपलोद्भवान् ३३ गात्राणि पंचगव्येन कांस्यानि दशभस्मना प्रायश्चित्तं स्मरेद्विप्रो ब्राह्मणो रूप
पादितं गोद्वयं दक्षिणां दद्यात् प्राजापत्यं समाचरेत् इतरेषां महाराज पंचगव्येन शोधनं ३५ सपुत्रैः सहपात्रैश्च कु
र्याद्ब्राह्मणभोजनं आकाशं वायुरग्निश्च मध्यं भूमिगतं जलं ३६ न दुष्यंतीह दर्भाश्च यज्ञेषु चमसा यथा न दुष्यंति
सदा भार्या गर्भोत्सेन संशयः ३७ उपवासव्रतैश्चैव विप्रसंभाषणादिभिः जपहोमैस्तथा दानैः शुध्यंते ब्राह्मणा
स्सदा ३८ इति श्रीपराशरे धर्मशास्त्रे नवमोध्यायः ९ अमेध्यरेतसा मांसं चांडालान्नमथापि वा यदि भुंक्ते च विप्रस्तु
ज्ञानात्कामतोपि वा कृच्छ्रं चांद्रायणं चरेत् १ तथैव क्षत्रियो वैश्योप्यर्द्धं चांद्रायणं चरेत् शूद्रोप्येवं यदा भुंक्ते प्राजाप
त्यं समाचरेत् २ पंचगव्यं पिबेच्छूद्रो ब्रह्मकूर्चं चरेद् द्विजः एकद्वित्रिचतुर्गा वा दद्याद्वर्णाननुक्रमात् ३ शूद्रान्नं
सूतकस्यान्नमभोज्यस्यान्नमेव च शंकितं प्रतिषिद्धान्नं सर्वोच्छिष्टं तथैव च ४ यदि भुंक्ते तु विप्रेण अज्ञानात्का
मतोपि वा ज्ञात्वा समाचरेत्कृच्छ्रं ब्रह्मकूर्चेन पावनं ५ बालैर्नकुलमार्जारैरन्नमुच्छिष्टितं यदा ति
लदर्भोदकैः प्रोक्ष्य शुध्यते नात्र संशयः ६ शूद्रोपभोज्यभुक्तान्नं पंचगव्येन शुध्यति क्षत्रियो वापि वैश्यश्च प्राजाप
त्येन शुध्यति ७ पीयूषं श्वेतलसुनं वृंताकफलगृंजनं पलांडुवृक्षनिर्यासं देवलल्लकानि च ८ उष्ट्रीक्षीरमवि
क्षीरमज्ञानाद्भुंजते द्विजः त्रिरात्रमुपवासः स्यात् पंचगव्येन शुध्यति ९ क्षत्रियो वापि वैश्यो वा क्रियावान् शुचिर्व्रती
तक्रेषु द्विजभोज्यं हव्यकव्येषु नित्यशः १० घृतं तैलं तथा क्षीरं दधि सर्पिः कुशोदकं पानं चैव तु पक्वान्नं तु

९
राम

कुर्याच्छिन्नसूत्रेटंतु कारयेत् गत्यानुकामतः कृत्वास्नात्मसेदनिकृंतये ११ अज्ञानाद्वपियः कुर्यात्कुर्यात्सान्द्रायणंयं
द्गागोमिथुनं दद्यात्कृच्छ्रः पाराशरोऽब्रवीत् १२ पितृदारान्समारुह्य मातृआप्तां महोदरीं गुरुपत्नीं स्नुषां चैव भ्रातृभार्यां
तथैव च १३ मातुलानीं सगोत्रीं च प्राजापत्यत्रयं चरेत् चान्द्रायणद्वयं कुर्याच्छुध्यते नात्र संशयः १४ दक्षिणां ब्राह्म
णे दद्यात् पंच गोमिथुनानि च सद्यो नकल्मषः पूतो मार्जनाद्दर्पणो यथा १५ गोगमने त्वत्रिरात्रं स्यात् गोदानं ब्राह्मणाय
ते महिषीं सूकरीं चैव अहोरात्रेण शुध्यति १६ पशुवेश्याभिगमने महिष्युष्ट्रीमजां तथा गत्वा तु सूकरीं मोहात्
प्राजापत्यं चरेन्नरः १७ मृदुपरस्तु मरे दुर्भिक्षे वा धनक्षये बन्दिग्राहभयाद्वापि दानस्यैनिरीक्ष्यते १८ चाण्डालैः सह
संपर्कं यावत्कृत्वा पुनो द्विजाः विप्राः दशावपन्नस्यात्सर्वदोषप्रकाशयेत् १९ आकण्ठसंमितं स्नात्वा गोमयोदक
तर्पणं तत्र स्थित्वा निराहारो ह्यहोरात्राद्विनिष्कृतिः २० सशिखं वपनं कृत्वा भुञ्जीयाद्यावकोदकं त्रिरात्रमुपव
सेनद्येकरात्रं जले वसेत् २१ शंखपुष्पीलतामूलं पत्रं च कुसुमं फलं क्षीरं सुवर्णसंमिश्रं क्वाथयित्वा पिबेद्बु
तान् २२ प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं गोद्वयं दक्षिणां दद्याच्छुद्धिः स्वायंभुवोऽब्रवीत् २३ चातुर्वर्ण्य
स्त्रियोऽप्येवं कृच्छ्रं चान्द्रायणं चरेत् यथा भूमिस्तथा नार्यस्तस्मान्न दूषयेत्सदा २४ बन्दिग्रहणया भुक्ता हत्वा बद्धा व
लाद्भयात् कृत्वा सान्तपनं कृच्छ्रं शुद्धिः पाराशरोऽब्रवीत् २५ सकृद्भुक्ता तु या नारी नेच्छन्ती पापकर्मभिः प्राजापत्येन शुद्धिः स्या
दृतुप्रस्रवणेन तु २६ पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत् गायत्रीं जपमानस्तु कृच्छ्रं सान्तपनं स्मृतं गोमूत्रं गोम
यं क्षीरं दधि सर्पिः कुशोदकं दिनमेकं न भुञ्जीत कृच्छ्रं सान्तपनं परं जारेण जनयेद्गर्भं गते त्यक्ते मृते पतौ तां त्यजेदपरे
राष्ट्रे पतितां पापकर्मिणीम् २९ पुंसत्ववर्जितायाश्चानुपरिग्रहं तु यदाचरेत् सा तु नष्टा विशुद्धिः स्यात् ... गमनं पुनः २

निर्णयप्र०
त्तेन च ३७
ध्रयन्त्र०
न्नेव ३

तेजोसि शुक्रमित्याज्यं देवस्यत्वा कुशोदकं मध्यमेन पलाशेन ... त्वापिबेत् ३३ ... तं चैव होमयेदग्नि
न्निधौ सप्तपत्रास्तु याः प्रोक्ताः अच्छिन्नाग्निसमंततः ३४ उद्धृत्य हुत्वा ... या अग्निसोमाय चैव सावित्री च इदं विष्णुर्मा
नस्तोके तथैव च ३५ गायत्र्याद्यनुगायत्री ... मध्ये व्याहृतिभिस्तथा हुत्वा हुत्वा ततः शेषं पञ्चगव्यं पिबेत् ३६ आल
प्रप्रणवेनैव त्रिः पिबेत्पावनेन च ३७ यत्त्वगस्थिगतं पापं देहे तिष्ठति देहिनां ब्रह्मकूर्चो दहेत्सर्वं यथैवाग्निरिवेन्धनं
३८ परपाकनिवृत्तस्य परपाकरतस्य च अपचस्य च यो भुङ्क्ते द्विजश्चान्द्रायणं चरेत् ३९ अपचस्य कृतं दानम
दातुश्च कुतः स्वर्गः दाता प्रतिगृहीता च द्वावेतौ नरकं व्रजेत् ४० ... पञ्चयज्ञान्समाचरेत् तानि ...
नैतु सर्वविज्ञेय ... देवता ४१ पञ्चयज्ञानुपासित्वा परान्नं ये तु भुञ्जते सततं प्रातरुत्थाय परपाक
रतो हि सः ४२ गृहधर्मं ब्रुवन्नेव देशधर्मविवर्जितः ऋषिभिः ... मार्गे ... परिवर्जिता ४३ यो गृही
त्वा विवाहाग्निं गृहस्थ इति मन्यते अन्नं तस्य न भोक्तव्यं वृथापाको हि स भवेत् ४४ युगे युगे तु ये धर्मास्तेषु
धर्मेषु ये द्विजाः तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः ४५ हुंकारं ब्राह्मणस्योक्त्वा त्वंकारं च गरीयसः स्नात्वा
नाश्नन्नहः शेषं प्रणिपत्य प्रसादयेत् ४६ ताडयित्वा तृणेनापि कण्ठे बद्ध्वापि वाससा विवादेनापि निर्जित्य प्रणिपत्य वि
सर्जयेत् ४७ ... अवगूर्य ... हत्वा ... अतिकृच्छ्रं चरेद्विप्रः कृच्छ्रं अभ्यन्तरशोणिते ४८ पञ्चाहमितकृ
च्छ्रः स्यात्परिपूतान्नभोजने त्रिरात्रमुपवासः स्यादतिकृच्छ्रः स उच्यते ४९ सर्वेषामेव वर्णानां संकरे समुपस्थिते
दशसाहस्रमभ्यस्तं गायत्र्याः शोधनं परं ५० इति श्रीपराशरे धर्मशास्त्रे एकादशमोध्यायः ११ अतः परं प्रवक्ष्यामि
... स्नानार्थं विप्रमायान्तं देवाः पितृगणाः सह वायु
नैतद्धि ... ते ... स्नानेन तु गंगायाः स्नातो भवति मानवः १

उमाहेणनपाचनं विप्रानीत्वानदीतीरेभुंजीयाच्छूद्रभोजनं मद्यमांसाशिनं नित्यं नीचकर्मानं तथैव च १२ नैवशूद्रंवर्जयेद्विप्रः
सूतकेमृतकेपिबा द्विजशुश्रूषणरतामद्यमांसविवर्जिता १३ स्वकर्मनिरतानित्यं नवासंभोजयेद्विजः अज्ञानाद्भुंजते
६ विप्राः सूतकेमृतकेपिबा १४ प्रायश्चित्तंकथंतेषां वर्णावर्णविनिर्दिशेत् गायत्र्यष्टसहस्रंतु भुक्त्वाशूद्रस्यसूतके १५
वैश्यः पंचदशेनैवत्रिंशता क्षत्रियस्तथा ब्राह्मणस्यतुभुक्त्वा प्राणायामेनशुध्यति १६ शुष्कान्नंगोरसंस्नेहं विप्र
समनिचागतं पक्वंविप्रगृहेपूतंभोज्यंतन्मनुरब्रवीत् आपत्कालेनविप्रेणभुक्तंशूद्रगृहेयदा मानस्तापेनशुध्ये
तद्रुपदांवापातजपेत् १८ दासनापितगोपालकुलमित्रार्धसीरिणः एतेशूद्रेषुभोज्यान्ना यश्चात्मानंनिवेदयेत्
१९ शूद्रकन्यासमुत्पन्नोब्राह्मणेननसंस्कृतः कापाल्लः सवैज्ञेयोभोज्योविप्रानसंशयः २० क्षत्रियकन्यासमुत्पन्न
ब्राह्मणेननसंस्कृतः क्षत्रियः क्षत्रियकन्यायांस्नातोजायतेपतिः २१ मार्गाः सर्वविशेषाभोज्योविप्रानसंशयः २२
भाण्डकस्यचभाण्डेषु ह्यापाद्यपयः पिबेत् अकामतस्तथाभुक्तेप्राजापत्यंसमाचरेत् २३ आनडोद्भयावेश्य
शूद्रयावाप्युपसर्पति अलकूर्चोपवासेनसर्वधर्मोविनिष्क्रमेत् २४ शूद्राणामोपरासंस्तुशूद्रादानतस्तुध्याति गो
दद्याच्चपंचकंकुर्याद्ब्राह्मणभोजनं २५ मोहान्माताप्रभावाच्चभंगंप्रकारयेत् त्रिरात्रेणेवशुध्यन्ति
७२ पुनरेवव्रतीभवेत् २६ गोमूत्रंगोमयंक्षीरं दधिसर्पिःकुशोदकं निर्दिष्टं पंचगव्यंचपवित्रंपापनाशनम् २७ गो
मूत्रंनीलवर्णायाः कृष्णायागोमयंहरेत् ताम्रवर्णायापयश्चश्वेतायाश्चदधिप्रोच्यते २८ कपिलायाघृतंग्राह्यं
महापातकनाशनं अलाभेसर्ववर्णानांकापिलायाविधीयते २९ गोमूत्रस्यपलंदद्यादंगुष्ठार्धंतुगोमयं क्षी
रंसप्तपलंदद्याद्दधित्रिपलमुच्यते ३० आज्यस्यैकपलंदद्यात्पलमेकंकुशोदकं समाहृत्यनमन्त्रैस्तुपृथक्
मंत्रविनिमिश्रयेत् ३१ गायत्र्यागृह्यगोमूत्रंगंधद्वारेतिगोमयं आप्यायस्वेतिचक्षीरं दधिक्राव्णेतिवैदधिः ३२

भूतानुगच्छन्ति नृपाः सलिलार्थिनः । स्नानार्थं विजन्मानो निःश्वासेन तेनैव पश्यन्ति [illegible] तेनेनन्तु तस्मान्न पि
द्येद्वयमङ्गत्वात्तिलतर्पणम् ५ नोत्तिष्ठेयः केश नूस्नाता पुनर्वस्त्र नहि जनः [illegible] लमवामोग्र द्युगाधीपिन्द
नो अलयापि स्थले वापि जलात्यद्य ६ शुचि उपस्पृशेत्समाक्रान्त उभय श्रुचिर्भवेन् मार्जनेजलमध्यानुप्राण
यामो यत्तत्तः ततः स्नानेयतः । आचमयत्र जपमुच्यते ७ जलगास्थलगावापि जलाजलगतापुनः प्राङ्मुखा
द्वाचयेत्समार्गमयन्तः प्राचः स्नात्वा पीत्वा [illegible] कुनेस्त प्रभुक्त्वा रथ्यापसर्पणे आचान्तः पुनराचामद्वासोविप
रिधाय च ८ क्षुते निष्ठीवने चैव दन्तोच्छिष्टे तथानृते पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत् ९ प्रभासादिषु तीर्थेषु
स्वयं स्नात्वा सर्वेषु नित्यशः । हृद्यन्ते कर्मवृन्दानि यः करोति पुमान् इ-तरो १० दिवाकरकरैः पूतं दिवा स्नानं प्रशस्यते अ
प्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात् ११ मारुतावस्वो रुद्रा आदित्याश्चैव देवताः सर्वे सोमे विलीयन्ते तस्मा
त्स्नानं तु संग्रहे १२ स्नानं दानं जपो होमः श्राद्धं राहुदर्शने अन्यत्र गाध्यायमुपरात्रि तस्मात्परिवर्जयेत् १३ खलु
यज्ञे विवाहे च संक्रान्तौ ग्रहणेषु च सर्वदा दानमन्येषु नान्यत्र निशि दृश्यते १४ गृहणो दाहसंक्रान्ति पु [illegible] प्रस
वेमृते स्नानं नैमित्तिकं प्रोक्तं दाने चैव तु रात्रिषु १५ पञ्चस्नानानि पुण्यानि कीर्तितानि मनीषिभिः आग्नेयं
वारुणं ब्राह्मं वायव्यं दिव्यमेव च १६ आग्नेयं भस्मना स्नानमवगाह्य तु वारुणं आपोहिष्ठेति च ब्राह्मं वायव्यं ग
वां रजः स्मृतं १७ कालेवार्यातपाकाले स्नायेन्मेघविवर्जितं तत्स्नानं दिव्यमित्युक्तं तस्नानं नहि व्यपरिकीर्तितं १८ इति श्री
पाराशरे धर्मशास्त्रे एकादशोऽध्यायः ११ दुःस्वप्नं यदि पश्येत्तु वान्ते वा क्षुरकर्मणि मैथुने प्रेतधूमे च स्नानमेव
विधीयते १ अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः २ वपनं मेख

लाहंडे भैक्ष्यचर्याव्रतेन च प्रव्रजने द्विजातीनां पुनः संस्कारकर्मणि ६ विण्मूत्रस्य शुद्ध्यर्थं प्राजापत्यं विधीयते पंचगव्येन
कृत्वा स्नात्वा पीत्वा विशुद्ध्यति ७ जलाग्निपतने चैव प्रव्रज्यानाशनेषु च सत्यावासितमेतेषां कथं शुद्धिर्विधीयते ८ प्रा
जापत्यद्वयेनान्ते तीर्थाभिगमनेन च गोद्वयं दक्षिणां दद्याच्छुद्धिं स्वायंभुवोऽब्रवीत् ९ मुच्यते भयपापेन ब्राह्मीं त्विन
वगच्छति गोकुले कुंदशालायां तैलयंत्रे तु यन्त्रयोः अनालोच्यानि शौचानि स्त्रीषु राजकुलेषु च चतुर्विंशगुणास्तन
स्य ब्रह्महा गुरुतल्पगः १० चतुर्दोषसमुत्पन्न आर्यांशकः कथं भवेत् ध्रुवं तस्य च कर्माणि कोपानहृद्गतः अ
हः कृतकर्मा विमहासाहसकारणात् गृहद्वारेषु तिष्ठन्भिक्षामिब्रह्मघातकः ११ गोकुलेषु च गोष्ठेषु ग्रामेषु
नगरेषु च तपोवनेषु तीर्थेषु नदीप्रस्रवणेषु च १२ एवं स्वर्वतीर्थानि पुण्यगत्वानुसागरं शतयोजनविस्तीर्ण
त्रययोजनमाप्नुत १३ रामचंद्रसमादिष्टनलसंचयसंचयं सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यापमार्जनं १४ ब्रह्महत्यावि
शुद्ध्यर्थमवगाह्य महोदधिं यजेत चाश्वमेधेन राजा तु पृथिवीपतिः १५ तस्य चवभृथे स्नात्वा पूतो भवति ब्रह्महा
पुनः प्रत्यागमो वेश्मवासार्थी तपस्विति १६ गावावस्त्रपवित्राणि भोजनं च विशेषतः सपुत्रः सहभृत्यैश्च कुर्या
द्ब्राह्मणभोजनं १७ गवां चैकशतं दद्याच्चतुर्वेदेषु दक्षिणा ब्राह्मणानां प्रसादेन ब्रह्महत्या विशुद्ध्यति १८
तत्पराशरं शास्त्रं श्लोकानां च चतुःशतं अष्टपंचाशतायुक्तं धर्मशास्त्रं समुच्चयं १९ य इदं धारयिष्यन्ति धर्मेण
स्व द्विजोत्तमः सर्वान्कामानवाप्स्यन्ति पराशरवचो यथा २० इति श्रीपराशरे धर्मशास्त्रे द्वादशोऽध्यायः १२
समाप्तोऽयं पराशरी स्मृतिः शुभमस्तु लेखकपाठकयोः संवत् १८८८ वैशाखप्रविष्ट २ तिथि दशमि भृगु
॥ राम